INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(7), January :2021
Online Copy Available: www.ijmer.in

# श्रीमद् वाल्मीकिरामायणे अद्भुतप्रपञ्चदर्शनम्

**Lanka SK Mallikarjuna Prasad**
Research Scholar
Department of Sahitya
Rsvidyapeethatirupati

रामस्य अयनम् रामायणम्। रामेण दर्शितो मार्ग इत्यर्थः। इदं रामायणं चतुर्विंशति साहस्ती संहिता इति प्रख्यातम्। इदं बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धा काण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम् उत्तरकाण्डमिति च सप्तकाण्डैः विलसति। इदं रामायणं आदिकाव्यमिति वाल्मीकिश्च आदिकविरिति च प्रसिद्धं वर्तते।

अद्भुतम् – आश्चर्यजनकवस्तूनिदृष्ट्वा अद्भुतरसस्य उत्पत्तिः भवति। अद्भउतो नाम विस्मयस्थायीभावः स च दिव्यजनदर्शन ईप्सितमनोरथाप्ति उपवनकुलाधिगमन सभा विमान माया इन्द्रजाल सम्भावनादिभिः विभावैः उत्पद्यते। रामायणे प्रत्येकस्मिन् काण्डे बहवः अद्भुतोपाख्यानि सन्ति। किष्किन्धा काण्डे सुग्रीवस्य भूपरिभ्रमणम् परमाद्भुतविषयाः ज्ञास्यामः।

वालिवधानन्तरं सुग्रीवः किष्किन्धायां अभिषिक्तः अत्रान्तरे वर्षाकालः समुपस्थितः। वर्षासु नदीनां तरणं सीतान्वेषणञ्च न साध्यमिति मत्वा स लक्ष्मणः श्रीरामः चतुरः मासान् माल्यवत्पर्वते निवासं कृतवान्। उपस्थितायाः अपि शरदि भोगवशः सुग्रीवः सीतान्वेषणे न श्रद्धादानः आसीत्। तदा रामप्रेषितः लक्ष्मणः सुग्रीवान्तकमागत्य रामकृता उपकारः त्वया विस्मृतमिति सुग्रीवं हन्तुमेव उद्यतः। तदानीं तारा नायं कार्ये प्रमत्तः। सीतान्वेषणार्थं प्रेषयितुं कोटिशः वानराः आहूताः तान् शरदि सीतान्वेषनार्थं प्रेषयेदेव इति आश्वासयामास।(वा.रा.4.33.50-60) ततः प्रसन्नः लक्ष्मणोपि सुग्रीवविज्ञप्तिं अङ्गीकृतवान्। सुग्रीवोपि लक्ष्मणमनुनीय सर्वमहं भूलोकं विस्तरेण जानामि नानादिक् वासिनः कपयः मम शासनात् आगताः वानरान् प्रेषयन् सर्वानुद्दिश्य तेषां अन्वेष्टव्यायां दिशि ये विशेषाः यत्र यत्र यस्यां दिशि सीता अन्वेषणीया इति विस्तरेणोक्तवान्। महेन्द्रः हिमवत् विन्ध्य कैलासशिखरेषु च मन्थरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः ते सर्वे अत्र आगच्छन्तु इति प्रथमं उवाच। प्रथमं प्राच्यां दिशं उद्दिश्य चत्वारिंशे सर्गे विनतादि कपिश्रेष्टान् प्रेषयामास। तत्र अन्वेष्टव्याः प्रदेशाः सुग्रीवेण एवमुदाहृताः।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(7), January :2021
Online Copy Available: www.ijmer.in

**वृतः शतसहस्रेण वानराणां तरस्विनां।**

**अधिगच्छ दिशं पूर्वां सशैलवनकाननाम्।।वा.रा.4.40.18**

अत्रदिशां अपेक्षा सुग्रीवस्थित देशात् बोध्या। प्रथमं भागीरथी नदी अन्वेष्टव्या सरयूः कौशिकीकालिन्दी इत्येताः नद्यः दृष्टव्याः। यमुनः पर्वतः अपि शोधनीयः। सरस्वती सिद्धः शोणा इत्यादयो नद्यः ब्रह्ममालः विदेहाः मागधाः पुण्ड्राः वङ्गाः इत्येते राज्यविशेषाः ततः उर्ध्वं मन्थरः पर्वतः मन्थरपर्वतभागेषु नरव्यघ्रनामकाः मनुष्याः वसन्ति। तेषु कर्मप्रावरणाः ओष्ठकर्णकाःलोहमुखाः जवनाः एकपादकाःइत्येते पुरुषादकाः किराताः तीक्ष्णचूडाः हेमाङ्गाः प्रियदर्शनाः इत्येते द्वीपवासिन अपक्कमीन आहाराश्च। ततः यवद्वीपमतिक्रम्य शिशिरः पर्वतो वर्तते। एतेषां सुवर्ण रुप्यकं यवद्वीपं सप्तराज्योपि शोभितम्। ततः समुद्रस्थ द्वारं गन्तव्यं ततः सप्तसमुद्रदीपं वर्तते।तत्र च्छायाग्राहकाः राक्षसाः ब्रह्मणानुग्रहाः दीर्घकालं बभुक्षिताः वसन्ति। अनन्तरं रक्तजलं लोहितं नाम सागरं भवति। तत्र बृहती शाल्मली द्रष्टव्या वैनतेयस्य गृहं तत्र वर्तते। शैलस्पृशाः मन्देहनामकाः राक्षसाः तत्र वसन्ति। ते सूर्योदयसमये सूर्यं भक्षयितुं ययन्ते। अहन्यहनि ते ब्रह्मतेजभिः निहताः भवन्त्येव। तदतिक्रम्य क्षीरोदंनाम सागरं तदनन्तरं जलोदसागरः श्रेष्ठः भवति। तत्रैव हयमुखं तेजः वर्तते। जातरूपशिलः महान् कनकपर्वतः त्रयोदशयोजनात्मकः वर्तते। ततः पन्नगपर्वतः द्रष्टव्यः तस्यपर्वतस्योपरि नीलवस्त्रधारी अनन्तः सहस्रशिराः वर्तन्ते। त्रिशिराः काञ्चनः केतुः तालरूपः अनन्तस्यविराजते। ततो उर्ध्वं उदयपर्वतः। तत्र योजनविस्तारं जातरुपमयं श्रृङ्गं भवति। स एव मेरुः विष्णुः तत्रैव त्रिविक्रमस्तृतीयं पादं निहितावान्। उत्तरे जम्बूद्वीपं सूर्यः मेरुं प्रदक्षिणीं करोति। तत्र वैखानसाः वालखिल्याः महर्षिणः तपश्चरन्ति। तस्य पुरः सुदर्शनो द्वीपः। एवं मेरोः प्राक् भागः भूलोकस्य द्वाररूपेण सूर्योदयात्मिका प्राचीदिक् वर्तते। अत्र सुग्रीवेण तत्तद् देशानां प्रत्यक्ष दृष्टाना मेव आश्चर्यकरं। वालिनः भीतः सुग्रीवः कञ्चित् कालं एकत्र स्थिरवासं अप्राप्य सर्वां भूमिं चचार। अतः सुग्रीवस्सर्वं जानातीति सुग्रीववचनैरेव स्पष्टम्। अत्र गङ्गां यमुनां कालिन्दिं च सर्वे द्रष्टुं शक्नुवन्ति। किन्तु मन्थरस्य ऊर्ध्वस्तान् प्राचीगतान् देशान् वालखिल्यादीन् महर्षीन् सक्तौदं क्षीरोदं च प्रवाहं कञ्चनं क्षीरं द्रष्टुंवा न प्रभवन्ति। एवं दवद्वीपादि देशोपि साधारणे मनुष्येन न दृश्य इति अभूतत्वात् सर्वोऽपि अद्भुतस्य विषयः। शक्तिमन्तोपि मनुष्याः तावन्तं विशालं देशं निश्शेषतया द्रष्टुं न पारयन्ति इति सर्वमाश्चर्यम्।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(7), January :2021
Online Copy Available: www.ijmer.in

अत्र मन्थरादूर्वं यवद्वीपानां तत्तत् देश्यानां वर्णनं आलम्बनविभावः। शेषादि दर्शनं उद्दीपनविभावः। नरव्यघ्रशरीरे एकदेशेन नराः अन्यस्मिन् भागे व्याघ्राः इति पुरुषविशेषाः न द्रष्टव्याः तद् रूपवर्णनमपि अद्भुतस्यैव उदाहरणम्। सञ्चारिणः अनुभावाः यथासम्भवमुन्नेयाः।

**दक्षिणदिशि वर्णनम्**

प्रथमं प्राचीप्रेषयित्वा प्रदक्षिण क्रमेण दक्षिणां दिशि वर्णयति। इमां दिशि उद्दिश्य कपिमुख्याः अङ्गदादयः ते सर्वे प्रेषिताः। वानरप्रधानाः विंशदधिकाः इमां दिशं प्रेषितः। दक्षिणस्यां दिशि प्रथमं सहस्रशिरस्कः विन्ध्यपर्वतः वर्तते। नर्मदानदी तामतीत्य गोदावरी कृष्णवेणी दशार्णाः अश्ववन्ती इति नगरद्वयं विदर्भाः देशाः वङ्गाः कलिङ्गाः, कौशिकाः इत्यादयो देशाः वर्तन्ते। दण्डकारण्यं अतीत्य नदी गोदावरी द्रष्टव्या। आन्ध्रः पुण्ड्रः चोलाः, पाण्डाः केरलाश्च इति देशः अयुमुखः पर्वतः कावेरीनदी मलयः पर्वतः ताम्रपर्णी नदी पाण्डो देशः महेन्द्रः पर्वतः इत्यादयो वर्णिताः। तत्र पाण्ड्याणां वर्णनेअगस्त्यास्य वर्णनमपि वर्तते। महेन्द्रपर्वते प्रतिसंवत्सरं इन्द्रः पर्वसु तस्यामेव दिशि सीता नीतं भविष्यति यतः दक्षिणसमुद्रमध्ये तस्य वसति लङ्का वर्तते।

दक्षिणसमुद्रमध्ये छायाग्राहिणी राक्षसी वर्तते नाम्ना सा अङ्गारिका अस्याः वर्णनम् हनुमता समुद्रलङ्घणे सुन्दरकाण्डे प्रथमसर्गेपि वर्तते। अनन्तरं हनुमान् छायाग्राहिणी हनिष्यसि. ततः पुष्पितकोनामगिरिः शतयोजने समुद्रे वर्तते। तस्य काञ्चनं श्रृङ्गं सूर्यः सेवते। तस्य श्रृङ्गः रजतनिर्मितः। कृतघ्नाः क्रूराः वा तम् पर्वतं द्रष्टुं न प्रभवन्ति।

**गिरिपुष्पितको नाम सिद्धचारण सेवितः।28**

**चन्द्रसूर्यांशुसङ्काशः सागराम्बुसमावृतः।**

**भ्राजते विपुलैः श्रृङ्गैः अम्बरं विलिखन्निव।।**

**तस्यैकं काञ्चनं श्रृङ्गं सेवतेऽयं दिवाकरः।**

**श्वेतम् राजतमेकं च सेवतेऽयं निशाकरः।।**

**न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः।वा.रा.4.41.29-31**

चतुर्दशयोजनप्रमाणः अनन्तरं वैद्यतोनाम पर्वतः वर्तते। वैद्युतपर्वते नाना विधाः वृक्षाः फलयुक्ताः भवन्ति। तदतिरिच्य नेत्ररम्यः मनोहरः कृञ्चलोनाम पर्वतः वर्तते। कुञ्जनप्रवतमतिक्रम्य नागानां निवासभूत भोगवतीपुरी द्रष्टव्या। स च सर्पराजेन वासुकिना पालिता। अनन्तरदेशे रत्नमयः ऋषभनामकः पर्वतो वर्तते। स च भूशीर्षकाकृतिः मत्मकं शमं हरितवर्णं च दिव्यं चन्दनं तत्र उत्पद्यते। चन्दनं दृष्ट्वापि स्पर्शः न कार्यः सोहितनामगन्धर्वाः तत वनं सर्वथा रक्षन्ति।

**गोशीर्षं पद्मकं च हरिश्यामं च चन्दनं।**

**दिव्यम् उत्पद्यते यत्र तच्चैवाग्निसमप्रभम्।।**

**न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं च कदाचन।**

**रोहिता नाम गन्धर्वा घोरा रक्षन्ति तद्वनम्।।**

**तत्र गन्धर्वपतयः पञ्च सूर्य समप्रभाः।**

**शौलूषो ग्रामणीः शिग्रुः शुभ्रो बभ्रुस्तथैव च।।**

**रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम्।**

**अन्ते पृथिव्या दुर्धर्षाः तत्र स्वर्गजितः स्थिताः।।वा.रा.4.41-44**

ततः यमस्य नगरं सम्यमनी भवति। पितृलोकः विश्वाभिः न द्रष्टव्यः। तत्र सीतान्वेषणं न सुलभम् इति सीता नान्वेष्टव्या। ताम् दृष्ट्वा मासात् निवृत्ताः भवता यश्च सीतां दृष्टा निवेदयति तम् मत् तुल्यविभवं करिष्यामि। अत्र दक्षिणस्यां दिशि समुद्रतीरपर्यन्तगमनपाञ्चराजपर्यन्तं भूभागदर्शनञ्च विस्मयकरं। किन्तु वेदगिरिः पुष्पितकगिरिः कुञ्जलगिरिः भोगवती नगरी वासुकिः गोशीर्षकादिच्छन्दनविरोषः सम्यमती इत्यादयः सर्वे भूलोकगतावर्णनं अद्भुतस्य विषयः एव। भोगवती सम्यमनी प्रभृतीनि भूलोकादूर्ध्वं इति पौराणिकाः वदन्ति। किन्तु भूलोके एव द्रष्टव्ये इति वर्णनं। अतः तेषां वर्णनं अद्भुतस्य विषयः।

अत्र पुष्पिताकारयः एव आलम्बनविभावः। मानुष्यैः अदृश्यत्वं उद्दीपनविभावः। राक्षसानां चेष्टाः अनुभावाः इति अद्भुतरसस्यायं विषयः।

**प्रतीच्यां दिशि वर्णनम्**

द्विचत्वारिंशे सर्गे प्रतीच्यां दिशः वर्णनं वर्तते। प्रतीचिदिशिं गन्तुं तारायाः पितरं सुषेणनामकं कपिश्रेष्ठं सुग्रीवः प्रार्थयामास। किन्तु सुषेणेन गन्तव्यायाः दिशः विशेषाः सुग्रीवेनैव निरुपिताः। सुराष्ट्रः बाह्लीकः चूरः भीमः इत्येतस्यायां दिशि मुख्यदेशाः तत्र पुन्नागवृक्षभूयिष्ठं वकुलवृक्षसमेतं केतकषण्डयुक्तं महदरण्यं वर्तते। समुद्रतीरे मुरचीमर्तनं जटीपुरं अवन्ती अङ्गलेपाइत्यादि नगराणि हेमगिरि पर्वतः सिंहाः तत्र अधिकाः भवन्ति। तत्र चतुर्विंशतिकोटिगन्धर्वाः हेमगिरौ वसन्ति। पार्यान्तरपर्वतोऽपि अनन्तरं वर्तते। तत्र स्तेभ्यः वृक्षेभ्यः वानरैः फलानि न ग्राह्यानि। तत्र गन्धर्वाः एव मूलफलानि रक्षन्ते। अतः तेभ्यः न भेतव्यं। वज्रनामकपर्वतः तत्र भवति। अस्यगुहासु सीतां अन्विष्य समुद्रस्य चतुर्थभागमाक्रम्य चक्रवान् पर्वतः वर्तते। सहस्रारचक्रं विश्वकर्मणा निर्मितं तत्र वर्तते। तस्मिन्नेवपर्वते नारायणः पञ्चननहयग्रीवराक्षसौं हत्वा तस्मात् पाञ्चजन्यशङ्कं सुदर्शनचक्रं च गृहीतवान्। ततः चतुष्षष्टियोजनमितिः वराहोनाम पर्वतः वर्तते। प्राक् ज्योतिषनगरे नरकोनाम राक्षस- वर्तते। ततः मेघवान् नाम पर्वतः काञ्चनमन्दिरः वर्तते। तत्रैव इन्द्रः अभिषिक्तः षष्ठिगिरिसहस्रयुक्तः मेघवान् पर्वतः तत्र वर्तते। एषां मध्ये मेरोरुत्तरभागः वर्तते। तत्रैव विश्वेदेवाः मरुतः वसवश्च वसन्ति।

**ते भविष्यन्ति रक्ताश्च प्रभया काञ्चनप्रभाः।**

**विश्वेदेवाश्च मरुतो वसवश्च दिवौकसः।**

**आगम्य पश्चिमां सन्ध्यां मेरुम् उत्तरपर्वतम्।।**

**आदित्यम् उपतिष्ठन्ति तैश्च सूर्योऽभि पूजितः।**

**अदृश्यः सर्वभूतानाम् अस्तं गच्छति पर्वतम्।।**

**योजनानां सहस्राणि दश तानि दिवाकरः।**

**मुहूर्तार्धेन तं शीघ्रम् अभियाति शिलोच्चयम्।।**

**श्रृङ्गे तस्य महद्दिव्यं भवनं सूर्यसन्निभम्।**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(7), January :2021
Online Copy Available: www.ijmer.in

**प्रासादगणसंबाधं विहितं विश्वकर्मणा।।42/38-42**

ततः अस्तगिरिः भवति। योजनानां दशसहस्राणि अतिक्रम्य मुहूर्तात् तेन सूर्योयाति मेरुपर्वतस्य अस्तगिरेः च मध्यभागे दशशराः तावद्वृक्षाः वर्तते। मेरुसावरणिः मनुः तत्र वसति। सीतामधिकृत्यस प्रष्टव्यः। एतावत्पर्यन्तं वानरैर्गन्तुं शक्यते। ततः ऊर्ध्वं भास्कररहितं सीमा रहितं चेति। ततः ऊर्ध्वं न गन्तव्यं सर्वमियं चरित्रं उक्त्वा चरित्वा मासान्ते पुनः अत्र **आगन्तव्यमिति सुग्रीवः कपीन् आदिदेश।**

**एतावज्जीवलोकस्य भास्करो रजनीक्षये।**

**कृत्वा वितिमिरं सर्वम् अस्तं गच्चति पर्वतम्।।**

**एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः।**

**अभास्करम् अमर्यादं न जानीमस्ततः परम्।।वा.रा.42.48,49**

एव मेरुसावर्णेः निवासभूतं मेघवत्पर्वतमेव सुग्रीवः जानाति ततः न जानातीति वर्णनात् भूमेः अतिविशालत्वं गम्यते। यत्र सूर्योपि गन्तुं न शक्नोति अद्यतनकाले धृवप्रान्ते सूर्यरस्मिः षन्मासान् न प्रसरतीति प्रसिद्धमेव। ततः ऊर्ध्वं लोकालोकः इति पुराणेषु प्रसिद्धः पर्वतः वर्णितः। अत्रापि पूर्ववत् अज्ञातानां देशानां वर्णनं च आश्चर्यकरं मेरुसावर्णिः आगामिमन्वन्तरे मनुः भविष्ति एवं पश्चिमदेशे कश्चित् दूरमेव गन्तुं शक्यते इति वर्णने धृवपर्वतपर्यन्तं सुग्रीवो जानातीति अद्भुतस्य विषयः। इदानीमपि गुजरात् राष्ट्रे सोमनाथदेवालये एकः प्रदेशः वर्तते। यथा आरभ्य दक्षिणधृवर्यन्तः भूभागः एव नास्ति केवलं एकार्णवमेव वर्तते इति।

अत्रापि मोघोदादीनां पर्वताः आलम्बनविभावः। किन्तु पूर्वस्यां दक्षिणस्यां दिशि जनसञ्चारयोग्याः देशाः वर्णिताः। प्रतीच्यां दिशि सिंहव्याघ्रभूयिष्ठानि अरण्यानि वर्णितानीति तेषां उद्दीपनविभावः। एवं मेघवत्पर्वतेः विश्वेदेवानां निवासः तस्यापि भूलोके वर्णनमपि विस्मयोत्पादकत्वात् अद्भुतालम्बनत्वं तत्तत् विशेष वर्णनमेव उद्दीपनविभावः अनुभावाः सञ्चारिणस्तु यथा सम्भवमुन्नेयाः।

**उदीचीदिक् प्रेषणं**

शतबलिनामकं वानरं शतसहस्र वानरपरिवृतं उदीच्यंदिशि गन्तुं प्रेषितवान्। म्लेच्छाः पुलिन्दाः, शूरसेनाः, भरताः पुरवः मन्द्रकाः कम्भोजाः यवनाः शकाः बाह्लीकाः ऋचिकाः पौरवाः टङ्कणाः चीनाः परमचीनाः नीहाराः दरदाः इत्येते देशाः अन्वेष्टव्येषु उदाहृताः।(वा.रा.4.43.11-15)हिमवत्पर्वतमतीच्य सुदर्सनः पर्वतः उत्तरेण देवसखपर्वतः। तम् अनतिक्रम्य कैलासः वर्तते। तस्यां नगर्यां कुबेरनगरी अलका वर्तते। अनन्तरं क्रौञ्चपर्वतः भवति। क्रौञ्चगिरिं द्रष्टुं प्रवेशः तस्मिन् पर्वते देवैः अपि पूज्याः महर्षयः वर्तन्ते। तदतिरिच्य मानसं सरः द्रष्टव्यं क्रौञ्चमतिक्रम्य मैनाकः वर्तते। तस्मिन् देशे वैखानसाः वालखिल्याः वसन्ति। तस्यां दिशायां कुबेरस्य वाहनं सार्वभौमनामकः गजः भवति। शैलोदनामिका नदी तत्र प्रवहति। शैलोदनद्यां उभयोस्तीरयोः कीचकाः नाम वीणवः भवन्ति। ते सिद्धान् पारं नयन्ति। तेषां सहायेन सिद्धाः नदीं तरन्ति इति भावः

**उभयो स्तीरयोस्तस्याः कीचका नाम वेणवः।**

**ते नयन्ति परं तीरं सिद्धान् प्रत्यानयन्ति च।।**

**उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः।43/39-40**

तां नदीं अतिरित्य उत्तराः गुरवः पुण्यवतां आश्रयभूताः वर्तन्ते। स च देशः महत्या सम्पदा विराजितः इति पञ्चदशभिः श्लोकैः उपवर्णितम्।

उत्तरकुरुन् अतिक्रम्य उत्तरसमुद्रः वर्तते। तन्मध्ये सोमगिरिः सुवर्णमयः वर्तते। इन्द्रलोकगताः ब्रह्मलोकगताश्च देवाः तम् गिरि आश्रयन्ते। सूर्यकान्त्या रहितोपि स देशः प्रकाशयुक्तः।

**सतु देशो विसूर्योऽपि तस्य भासा प्रकाशते।**

**सूर्यलक्ष्म्याऽभि विज्ञेयः तपतेव विवस्वता।**

**भगवानपि विश्वात्मा शम्भुरेकादशात्मकः।**

**ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः।।**

**न कथञ्चन गन्तव्यं कुरूणाम् उत्तरेण वः।**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(7), January :2021
Online Copy Available: www.ijmer.in

**अन्येषामपि भूतानां नातिक्रामति वै गतिः।**

**सहि सोमागिरिर्नाम देवानामपि दुर्गमः।।वा.रा.4.43.58-60**

अत्र क्रौञ्चपर्वतादारभ्य सर्वेदेशाः मानवैः अगम्याः सूर्ये न दृष्टः भवतीति उत्तरधृवदेशस्यात्। सर्वस्मिन् वर्णने सोमगिरेर्वर्णनं महदाश्चर्यस्थानम्। उत्तरुकुरूणां सम्पत्तिश्च विस्मयकारिमी इत्येयं विषयः सर्वोपि अद्भुतस्यैव उदाहरमम्। क्रौञ्चगिरेदारभ्य सर्वे विशेषाः विस्मयस्य आलम्बनविभावः। उत्तरकुरुणां वर्णनम् सोमगिरेः महिमा च उद्दीपनविभाव। अनुभावाः सञ्चारिणश्च श्रोतृगताः यथा सम्भवग्राह्याः। षट् चत्वारिंशे सर्गे सुग्रीवः स्व भूभ्रमण कारणम् सर्वं श्रीरामं उक्तवान्। इति सुग्रीवस्य विषयाणां अपरोक्षत्वेपि पाठकैः कदापि मनसाप्यचिन्तिताः इत्यद्भुतस्य लक्ष्यभूताः भवन्ति।